# Brahmakritam 09 Vishnu Stotram

# બ્રહ્મકૃતં ૯ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Brahmakritam 09 Vishnu Stotram

File name : brahmakRRitaM09viShNustotram.itx

Category : vishhnu, vishnu, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 8/5/26-50||

Latest update : September 23, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 23, 2025

*sanskritdocuments.org*

Brahmakritam 09 Vishnu Stotram

# બ્રહ્મકૃતં ૯ વિષ્ણુસ્તોત્રમ્

બ્રહ્મોવાચ ।

અવિક્રિયં સત્યમનન્તમાદ્યં ગુહાશયં નિષ્કલમપ્રતર્ક્યમ્ ।
મનોઽગ્રયાનં વચસાનિરુક્તં નમામહે દેવવરં વરેણ્યમ્ ॥ ૨૬॥

વિપશ્ચિતં પ્રાણમનોધિયાત્મનામર્થેન્દ્રિયાભાસમનિદ્રમવ્રણમ્ ।
છાયાતપૌ યત્ર ન ગૃધ્રપક્ષૌ તમક્ષરં ખં ત્રિયુગં વ્રજામહે ॥ ૨૭॥

અજસ્ય ચક્રં ત્વજયેર્યમાણં મનોમયં પઞ્ચદશારમાશુ ।
ત્રિનાભિ વિદ્યુચ્ચલમષ્ટનેમિ યદક્ષમાહુસ્તમૃતં પ્રપદ્યે ॥ ૨૮॥

ય એકવર્ણં તમસઃ પરં તદલોકમવ્યક્તમનન્તપારમ્ ।
આસાં ચકારોપસુપર્ણમેનમુપાસતે યોગરથેન ધીરાઃ ॥ ૨૯॥

ન યસ્ય કશ્ચાતિતિતર્તિ માયાં યયા જનો મુહ્યતિ વેદ નાર્થમ્ ।
તં નિર્જિતાત્માઽઽત્મગુણં પરેશં નમામ ભૂતેષુ સમં ચરન્તમ્ ॥ ૩૦॥

ઇમે વયં યત્પ્રિયયૈવ તન્વા સત્ત્વેન સૃષ્ટા બહિરન્તરાવિઃ ।
ગતિં ન સૂક્ષ્મામૃષયશ્ચ વિદ્મહે કુતોઽસુરાદ્યા ઇતરપ્રધાનાઃ ॥ ૩૧॥

પાદૌ મહીયં સ્વકૃતૈવ યસ્ય ચતુર્વિધો યત્ર હિ ભૂતસર્ગઃ ।
સ વૈ મહાપૂરુષ આત્મતન્ત્રઃ પ્રસીદતાં બ્રહ્મ મહાવિભૂતિઃ ॥ ૩૨॥

અમ્ભસ્તુ યદ્રેત ઉદારવીર્યં સિધ્યન્તિ જીવન્ત્યુત વર્ધમાનાઃ ।
લોકાસ્ત્રયોઽથાખિલલોકપાલાઃ પ્રસીદતાં બ્રહ્મ મહાવિભૂતિઃ ॥ ૩૩॥

સોમં મનો યસ્ય સમામનન્તિ દિવૌકસાં વૈ બલમન્ધ આયુઃ ।
ઈશો નગાનાં પ્રજનઃ પ્રજાનાં પ્રસીદતાં નઃ સ મહાવિભૂતિઃ ॥ ૩૪॥

અગ્નિર્મુખં યસ્ય તુ જાતવેદા જાતઃ ક્રિયાકાણ્ડનિમિત્તજન્મા ।
અન્તઃસમુદ્રેઽનુપચન્ સ્વધાતૂન્ પ્રસીદતાં નઃ સ મહાવિભૂતિઃ ॥ ૩૫॥

યચ્ચક્ષુરાસીત્તરણિર્દેવયાનં ત્રયીમયો બ્રહ્મણ એષ ધિષ્ણ્યમ્ ।

દ્વારં ચ મુક્તેરમૃતં ચ મૃત્યુઃ પ્રસીદતાં નઃ સ મહાવિભૂતિઃ ॥ ૩૬॥

પ્રાણાદભૂદ્યસ્ય ચરાચરાણાં પ્રાણઃ સહો બલમોજશ્ચ વાયુઃ ।
અન્વાસ્મ સંરાજમિવાનુગા વયં પ્રસીદતાં નઃ સ મહાવિભૂતિઃ ॥ ૩૭॥

શ્રોત્રાદ્દિશો યસ્ય હૃદશ્ચ ખાનિ પ્રજજ્ઞિરે ખં પુરુષસ્ય નાભ્યાઃ ।
પ્રાણેન્દ્રિયાત્માસુશરીરકેતં પ્રસીદતાં નઃ સ મહાવિભૂતિઃ ॥ ૩૮॥

બલાન્મહેન્દ્રસ્ત્રિદશાઃ પ્રસાદાન્મન્યોર્ગિરીશો ધિષણાદ્વિરિઞ્ચઃ ।
ખેભ્યશ્ચ છન્દાંસ્યૃષયો મેઢ્રતઃ કઃ પ્રસીદતાં નઃ સ મહાવિભૂતિઃ ॥ ૩૯॥

શ્રીર્વક્ષસઃ પિતરશ્છાયયાઽઽસન્ ધર્મઃ સ્તનાદિતરઃ પૃષ્ઠતોઽભૂત્ ।
દ્યૌર્યસ્ય શીર્ષ્ણોઽપ્સરસો વિહારાત્પ્રસીદતાં નઃ સ મહાવિભૂતિઃ ॥ ૪૦॥

વિપ્રો મુખં બ્રહ્મ ચ યસ્ય ગુહ્યં રાજન્ય આસીદ્ભુજયોર્બલં ચ ।
ઊર્વોર્વિડોઽજોઽઙ્ઘ્રિરવેદશૂદ્રૌ પ્રસીદતાં નઃ સ મહાવિભૂતિઃ ॥ ૪૧॥

લોભોઽધરાત્પ્રીતિરુપર્યભૂદ્દ્યુતિર્નસ્તઃ પશવ્યઃ સ્પર્શેન કામઃ ।
ભ્રુવોર્યમઃ પક્ષ્મભવસ્તુ કાલઃ પ્રસીદતાં નઃ સ મહાવિભૂતિઃ ॥ ૪૨॥

દ્રવ્યં વયઃ કર્મ ગુણાન્ વિશેષં યદ્યોગમાયાવિહિતાન્ વદન્તિ ।
યદ્દુર્વિભાવ્યં પ્રબુધાપબાધં પ્રસીદતાં નઃ સ મહાવિભૂતિઃ ॥ ૪૩॥

નમોઽસ્તુ તસ્મા ઉપશાન્તશક્તયે સ્વારાજ્યલાભપ્રતિપૂરિતાત્મને ।
ગુણેષુ માયારચિતેષુ વૃત્તિભિર્ન સજ્જમાનાય નભસ્વદૂતયે ॥ ૪૪॥

સ ત્વં નો દર્શયાત્માનમસ્મત્કરણગોચરમ્ ।
પ્રપન્નાનાં દિદૃક્ષૂણાં સસ્મિતં તે મુખામ્બુજમ્ ॥ ૪૫॥

તૈસ્તૈઃ સ્વેચ્છાધૃતૈ રૂપૈઃ કાલે કાલે સ્વયં વિભો ।
કર્મ દુર્વિષહં યન્નો ભગવાંસ્તત્કરોતિ હિ ॥ ૪૬॥

ક્લેશભૂર્યલ્પસારાણિ કર્માણિ વિફલાનિ વા ।
દેહિનાં વિષયાર્તાનાં ન તથૈવાર્પિતં ત્વયિ ॥ ૪૭॥

નાવમઃ કર્મકલ્પોઽપિ વિફલાયેશ્વરાર્પિતઃ ।
કલ્પતે પુરુષસ્યૈષ સ હ્યાત્મા દયિતો હિતઃ ॥ ૪૮॥

યથા હિ સ્કન્ધશાખાનાં તરોર્મૂલાવસેચનમ્ ।
એવમારાધનં વિષ્ણોઃ સર્વેષામાત્મનશ્ચ હિ ॥ ૪૯॥

નમસ્તુભ્યમનન્તાય દુર્વિતર્ક્યાત્મકર્મણે ।
નિર્ગુણાય ગુણેશાય સત્ત્વસ્થાય ચ સામ્પ્રતમ્ ॥ ૫૦॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે અષ્ટમસ્કન્ધે પઞ્ચમાધ્યાયાન્તર્ગતં
બ્રહ્મકૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૮/૫/૨૬-૫૦॥

bhAgavatapurANa . adhyAya 8/5/26-50..

Proofread by PSA Easwaran

*Brahmakritam 09 Vishnu Stotram*

pdf was typeset on September 23, 2025

Please send corrections to *sanskrit@cheerful.com*